"सूक्ष्माणि ताम्रपत्राणि कृत्वा संस्वेदयेद्बुधः । वास-रत्रयमम्लेन ततः खाते विनिःक्षिपेत् । पादांशं सूतकं दत्त्वा याममम्लेन मर्द्दयेत् । तत उद्धृत्य पत्राणि लेपये-द्द्विगुणेन च । गन्धकेनाम्लपिष्टेन तस्य कुर्य्याच्च गोल-कम् । ततः पिष्ट्वा च मीनाक्षीं चाङ्गेरीं वा पुनर्न-वाम् (चाङ्गेरी चतुष्पत्राम्ललोनिकाभेदः ।) तत्कल्केन बहिर्गोलं लेपयेद्द्व्यङ्गुलोन्मितम् । धृत्वा तद्गोलकं भाण्डे शरावेण च रोधयेत् । वालुकाभिः प्रपूर्य्याथ विभूति लवणाम्बुभिः । दत्त्वा भाण्डमुखे मुद्रां ततश्चूल्ल्यां विपा-चयेत् । क्रमवृद्धाग्निना सम्यग्यावद्यामचतुष्टयम् । स्वाङ्गशीतं समुद्धृत्य मर्दयेच्छूरणद्रवैः । यामैकं गोलकं तच्च निःक्षिपेच्छूरणोदरे । मृदा लेपस्तु कर्त्तव्यः सर्वतोऽङ्गुष्ठमात्रकः । पाच्यं गजपुटे क्षिप्रं मृतं भवति निश्चितम् । वमनं च विरेकं च भ्रमं श्रमभयाक्-लमम् । विदाहं स्वेदमुत्क्लेदं न करोति कदाचन । एवं मारितस्य ताम्रस्य गुणा ताम्रं कषायं मधुरं च तिक्तमम्लञ्च पाके कटु सारकञ्च । पित्तापहं श्लेष्महरञ्च शीतं तद्रोपणं स्याल्लघु लेखनञ्च । पाण्डूदरार्शोज्वर कुष्ठकासश्वासक्षयान् पीनसमम्लपित्तम् । शोथं कृमिं शूलमपाकरोति प्राहुर्बुधा बृंहणमल्पमेतत्" ।

"ताम्रमम्लेन शुद्ध्यति" मनुः । ताम्रपात्रशब्दे भोजननि-षेधः एतेतरोद्धृतसारगव्यभोजननिषेधश्च वक्ष्यते । रक्त-वर्णविशिष्टे "ताम्रौष्ठपर्य्यस्तरुचः स्मितस्य" "तपस्विने ताम्ररुचा करेण" कुमा० "प्रचक्रमे पल्लवरागताम्रा" रघुः । ५ द्वीपभेदे पु० । स्वार्थे क । तत्रार्थे अमरः ।

**ताम्रकर्ण** त्रि० ताम्रौ कर्णौ यस्य । १रक्तकर्णयुक्ते स्त्रियां ङीष् । ङीषन्तः २पश्चिमदिग्हस्तिन्याम् अमरः ।

**ताम्रकार** पुंस्त्री० ताम्रं ताम्रपात्रादिकं करोति कृ—अण् उप० स० । ताम्रोपजीविनि सङ्कीर्णजातिभेदे । "आ योगवेन विप्रायां जातास्ताम्रोपजीविनः" कंसकार-शब्दे दृश्यम् । स्त्रियां जातित्वात् ङीष् ।

**ताम्रकुट्ट** पुंस्त्री० ताम्रं कुट्टयति कुट्ट—अण् उप० स० । ताम्रकारे (काँसारि) संकीर्णजातिभेदे । ण्वुल् । ता-म्रकुट्टक तत्रार्थे अमरः ।

**ताम्रकुण्ड** न० कुण—ड कित् ताम्रमयं कुण्डम् । ताम्रमये देवजलाधारे पात्रभेदे "देवतान्यजलाधारः कुण्डं कुण्ड-मुखा स्मृताः" "शाश्वतः उपचारात् ताम्रकुण्डम्" उज्ज्व०

**ताम्रकूट** पुंन० ताम्रस्य कूटमिव । रक्तवर्णनिर्यासके (ता-माक) क्षुपभेदे "संविदा कालकूटं च ताम्रकूटं च धुस्तुरम् । अहिफेनं खर्जूरसस्ताड़िका तरिता तथा । इत्यष्टौ सिद्धिद्रव्याणि यथा स्यूर्योष्टकं तथा" कुला० त० ।

**ताम्रकृमि** पु० कर्म० । इन्द्रगोपकीटे हारा० ।

**ताम्रगर्भ** न० ताम्रं गर्भे इवोत्पत्तिस्थानमस्य । तुत्थे (तुंते) राजनि० । तस्य ताम्रोद्भवत्वं तुत्थशब्दे दृश्यम् ।

**ताम्रचूड़** पुंस्त्री० ताम्रा रक्ता चूड़ा यस्य । १कुक्कुटे (कुकड़ा) ख्याते खगे अमरः स्त्रियां ङीष् । तद्रुतविशेषफलं बृ०सं० ८८अ० यथा "भीता रुवन्ति कुक्कुकिति ताम्रचूड़ास्त्यक्ता रुतानि भयदान्यपराणि रात्रौ" । कुक्कुटस्य द्विविधः नारि-केलाकृतिः प्राच्यवाटः, बलाकाकृतिश्च प्रतीच्यवाटः । तत्र प्राच्यवाटः बलाधिकः । तथैव वर्णितं दशकुमारे ताम्र-चूड़युद्धाधिकारे । "कथमिव नारिकेलजातेः प्राच्य-वाटकुक्कुटस्य प्रतीच्यवाटः पुरुषैरसमीक्ष्य बलाका-जातिस्ताम्रचूड़ो बलप्रमाणाधिकस्यैवं प्रति विसृष्ट इति । "प्रायुध्यत चातिसंरब्धमनुप्रहारप्रवृत्तपक्षतुण्डकनखाग्री-रवरवं विहङ्गमद्वयम् । जितश्चासौ प्रतीच्यवाट कुक्कुटः" दशकु० । २कुक्कुरद्रुमे (कुकसिमा) राजनि० । तस्य रक्त-शिखत्वात्तथात्वम् । "द्वाभ्यां गृहीत्वा पाणिभ्यां शक्तिं चान्येन पाणिना । अपरेणाग्निदायादस्ताम्रचूडं भुजेन सः । महाकायमुपश्लिष्टं कुक्कुटं बलिनां वरम्" भा० व० २२४अ० तत्रैव "अरुणस्ताम्रचूड़ञ्च प्रददौ चरणायुधम्" । ३कुमारानुचरमातृगणभेदे स्त्री "सुभगा लम्बिनी लम्बा ताम्रचूड़ाविकाशिनी" भा० श० ४७ अ० । मातृगणोक्तौ ४रक्तशिखायुक्ते त्रि० ताम्रचूड़भैरवः ।

**ताम्रजाक्ष** पु० सत्यभामायां कृष्णाज्जाते पुत्रभेदे । "जज्ञिरे सत्यभामायां भीमो भीमरथः क्षुपः । रोहितो दीप्तिमां-श्चैव ताम्रजाक्षो जलान्तकः । भान्वभीमरिका चैव ताम्र-पक्षा जलन्धमा । चतस्रो जज्ञिरे तेषां स्वसारो गरु-ड़ध्वजात्" हरिवं० १६२ अ० ।

**ताम्रत्रपुज** पु० ताम्रञ्च त्रपु च ताभ्यां जायते जन—ड । कांस्ये भावप्र० । तस्योभयधातुजन्यत्वात् तथात्वम् ।

**ताम्रदुग्धा** स्त्री ताम्रं रक्तं दुग्धं निर्यासोऽस्याः । गोरक्ष दुग्धायां राजनि० ।

**ताम्रद्वीप** पुंन० । कर्म० । दक्षिणदेशस्थे द्वीपभेदे । "द्वीपं ताम्राह्वयञ्चैव पर्वतं रामकं तथा । तिमिङ्गिलञ्च स न्वपं वशे कृत्वा महामतिः" भा० स० ३० अ० । सह-देवदक्षिणदिग्विजये ।